# Shri Gadadhara Stotram

# श्रीगदाधरस्तोत्रम्

## Document Information

Text title : Shri Gadadhara Stotram

File name : gadAdharastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Sharachchandra Chakravarti

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीगदाधरस्तोत्रम्

घनचेतनमक्रियमादिमजं, चिर-निश्चल-निष्कल निर्विरुजम् ।
सुख-सद्म-विशुद्ध-विबुद्ध वरं, प्रणमामि-गदाधर ब्रह्मपरम् ॥ १॥

शत-सौरि-मुरारि-तरङ्गयुतं, अयुतायुत-भास्कर-कुक्षिवृतम् ।
सुविशाल-समुद्र-सुदभ्रकरं, प्रणमामि गदाधर ब्रह्मपरम् ॥ २॥

क्षुदिराम-विराम-विलासकरं, छल जृम्भितकारण कार्यवलम् ।
जितकाञ्चन-काम-प्रपञ्चहरं, प्रणमामि गदाधर ब्रह्मपरम् ॥ ३॥

युगधर्म-प्रवर्तक-गुप्तनरं, जनपावन-गाङ्ग्य-तटावसथम् ।
शिशुसौम्यमगम्य-प्रणम्यवरं, प्रणमामि गदाधर-ब्रह्मपरम् ॥ ४॥

शिव-केशव-वासव-सङ्गयुतं, अवतारगरिष्ठमरिष्ट-हतम् ।
अघमोचन दुष्कृत मुक्तिकरं, प्रणमामि गदाधर-ब्रह्मपरम् ॥ ५॥

करुणाघन-कर्मकठोर-पणं, गुणहीनमपापमशेष गुणम् ।
युगचक्र-विवर्तक तर्कहरं, प्रणमामि गदाधर-ब्रह्मपरम् ॥ ६॥

शुभ बेलूड-मन्दिर-सन्निहितं, निजशिष्य प्रशिष्य-विशेषरतम् ।
शिवमोक्ष-धनेश्वरमादिगुरुं, प्रणमामि गदाधर-ब्रह्मपरम् ॥ ७॥

सुगभीर-समाधिसमुद्र-गतं, कृतभक्तिविकासन-विश्वहितम् ।
तव शुभनाम-भवतापहरं, प्रणमामि गदाधर-ब्रह्मपरम् ॥ ८॥

इति श्रीशरच्चन्द्रचक्रवर्ती विरचितं “श्रीगदाधरस्तोत्रम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*